नवीनः काव्यशास्त्रग्रन्थः

देवर्षि-कलानाथशास्त्री

अभिनवकाव्यालङ्कारसूत्रम्- प्रणेता प्रो. राधावल्लभत्रिपाठी, सम्पादको हिन्दी व्याख्याकारश्च- डॉ. रामकान्तपाण्डेयः, प्रकाशकः-जगदीशसंस्कृतपुस्तकालयः, झालानियों का रास्ता, जयपुरम्, पृ.सं. ३९०, मू. ५००रु.

काव्यशास्त्र-लक्षणग्रन्थानामनेकशताब्दीव्यापीतिहासः सुविदितः। एतेषु लक्षणग्रन्थेषु भामह-वामनानन्दवर्धन-मम्मट-विश्वनाथ-जगन्नाथादिप्रणीतेषु बहवः कारिका- वृत्तिशैलीबद्धाः सन्ति, बहवः सूत्र-विवृतिबद्धाः सन्तीत्यपि सुविदितम् लक्षणग्रन्थानामयं क्रमोऽद्यावधि प्रचलतीतीदमपि गतेषु दिनेषु बहूनामाधुनिकसाहित्यविदुषां नूतनैर्लक्षणग्रन्थैः प्रत्यायितम्। एषु अभिराजराजेन्द्रमिश्राणामभिराजयशोभूषणं प्रकाशितचरं यद् 'भारत्या' मपि समीक्षितचरमिति स्मरेयुः पाठकवर्याः। अन्येऽपि तादृशलक्षणग्रन्था भारत्यां चर्चितचराः। क्रममिमं परिचालयन् राष्ट्रियसंस्कृतसंस्थानकुलपतीनां डॉ. राधावल्लभत्रिपाठिनां काव्यशास्त्रीयो लक्षणग्रन्थः प्रकाशितोऽभूत्तस्य हिन्दी-अनुवादसहितं नूतनं संस्करणं जयपुरात् प्रकाशितमिति सूचयन्तः प्रमोदामहे।

"अभिनवकाव्यालङ्कारसूत्रम्" इति शीर्षकं वहन्नयं ग्रन्थोऽधिकरणत्रये विभक्तोऽस्ति। अयं सूत्र-विवृतिशैल्यां निबद्धोऽस्ति। प्रथमं तु "लोकानुकीर्तनं काव्यम्" "स च लोकस्त्रिविधः" आधिभौतिकः, आधिदैविकः, आध्यात्मिकश्च। इत्यादिशैल्यां सूत्राणि दत्तानि, तदनन्तरं तेषां विवृतिः पद्ये गद्ये च सोदाहरणा प्रदत्ताऽस्ति। प्रथमेऽधिकरणे काव्यलक्षणं, द्वितीयेऽलङ्कारनिरूपणं तृतीये च काव्यभेदानां निरूपणमस्ति। मध्ये मध्ये कारिकारूपेण अनुष्टुप्सु आर्यावृत्तानुहारिषु छन्दोबद्धेषु पद्येष्वपि च कुत्रचित् स्वाभिप्रायो लक्षणकारेण प्रकटीकृतोऽस्ति।

सर्वत्र लक्षणकारस्य क्रान्तिकारिणी, 'नवा' दृष्टिः, नूतनोऽभिगमः, अभिनवतायां च प्रवृत्तिर्दृग्गोचरीभवति, प्राचां खण्डनमपि वृत्तौ कृतं दृश्यते। यथा तृतीयेऽधिकरणे काव्यभेदेषु महाकाव्य-खण्डकाव्य-गीत-मुक्तक-छन्दोमुक्त-कविता-गजल-समस्या-निबन्ध-कथोपन्यास-संस्मरण-रेखाचित्र-जीवनचरितात्मकथा-यात्रावृत-रूपकेति भेदा लक्षिताः। अत्र नूतनानि प्रस्थानानि समावेशितानीति स्पष्टमेव। "दिङ्मात्रमिदं

निरूपितमिति" पर्यन्ते कथयतो लक्षणकारस्य तात्पर्यमिदमेव प्रतीयते यत्प्राप्ते समये स रूपकस्य सर्वान् नूत्नान् भेदान् विवेचयिष्यति। ग्रन्थेऽस्मिंस्तु रूपकस्य भेदद्वयमेव सूचितम्। एकाङ्कं नाटकं च। एकाङ्कं प्रसङ्गविशेष एव प्रस्तूयते, नाटके तु समग्रं जीवनमिति। यथासमयमग्रे (आगामिनि ग्रन्थे) लक्षणकारो रूपकाणामन्यानपि प्रकारान् सूचयेदिति सम्भवति यथा रेडियो रूपकं (यत् श्रव्यं भवति, नाटकस्य दृश्यकाव्यत्वे स्वीकृतेऽपि!) दूरदर्शनधारावाहिकम् (दृश्यश्रव्यम्), चलचित्रम् इत्यादीन्।

यथा लक्षणप्रस्तुतौ, भेदोपभेदपरिकल्पने च सर्वथा नूतना दृष्टिरेव ग्रन्थेऽस्मिन् परिलक्ष्यते, तथा उदाहरण-प्रस्तुतावपि नूतना दृश्यते। लेखकेन नूतनानामेव कवीनां डॉ. हर्षदेवमाधवसदृशानां, स्वस्य वोद्धरणान्युदाहरणरूपेण प्रस्तुतानि बहुषु स्थलेषु।

सर्वस्यापि ग्रन्थगतस्य वस्तुनो हिन्द्यामनुवादो डॉ. रमाकान्तपाण्डेयेन कृतोऽस्ति। अनेन ग्रन्थस्य सर्वग्राह्यत्वं संजातमस्तीति वर्धापयामो लेखकमनुवादकं च द्वावपि। हिन्दीव्याख्याया नाम "अभिनवदीपिके" त्यस्ति।

शीघ्रतायां मुद्रितमिदं संस्करणमिति यत्र कुत्रचिद् या अशुद्धयः प्रतीयन्ते ता मुद्रणाशुद्धयः स्युरिति सुशकमनुमातुम्। अग्रतरेषु संस्करणेषु तासां संशोधनं सम्पत्स्यत इति स्पष्टमेव।